


# ५ दानवीरः कर्णः

(प्रस्तुत पाठ महाकवि भास द्वारा रचित सुप्रसिद्ध एकांकी नाटक *कर्णभारम्* से संकलित है। यह प्रसंग महाभारत के युद्ध के समय का है। इस नाट्यांश में दानवीर कर्ण की अद्वितीय दानशीलता और त्याग की पराकाष्ठा को दर्शाया गया है। अर्जुन की सहायता करने के लिए देवराज इंद्र (शक्र) एक ब्राह्मण का वेष धारण करके कर्ण के पास आते हैं और उनसे बड़ी भिक्षा की मांग करते हैं। इसका नैतिक संदेश यही है कि सच्ची दानशीलता, त्याग और अपने वचनों के प्रति निष्ठा ही मनुष्य को अमर बनाती है चाहे उसके लिए कितनी भी बड़ी कीमत क्यों न चुकानी पड़े।

The presented text has been compiled from the famous one-act play *Karnabharam*, composed by the great poet Bhasa. This context is from the time of the Mahabharata war. This dramatic excerpt depicts the unparalleled generosity and the ultimate pinnacle of sacrifice of the benevolent Karna. To assist Arjuna, Devraj Indra (Shakra) approaches Karna in the guise of a Brahmin and demands great alms. The moral message of this is that true generosity, sacrifice, and loyalty to one's words make a person immortal, no matter how high a price has to be paid for it.

*(ततः प्रविशति ब्राह्मणवेषधारी शक्रः)*

**शक्रः** – भो कर्ण ! महत्तरां भिक्षां याचे।

**कर्णः** – भगवन् ! कर्णोऽहं भवन्तं नमस्करोमि। आज्ञापय किमिच्छसि किं ददामि।

**शक्रः** – महत्तरां भिक्षां याचे।

**कर्णः** – महत्तरां भिक्षां भवते प्रदास्ये। गोसहस्रं ददामि।

© NCERT not to be republished



**शक्रः** – मुहूर्तकं क्षीरं पिबामि। नेच्छामि कर्ण!

**कर्णः** – किं नेच्छति भवान्? वाजिनां सहस्रं ते ददामि।

**शक्रः** – मुहूर्तकमारोहामि। नेच्छामि कर्ण! नेच्छामि।

**कर्णः** – एतत् वारणानां वृन्दं ददामि।

**शक्रः** – एतदपि नेच्छामि।

**कर्णः** – अन्यदपि श्रूयताम्। अपर्याप्तं कनकं ददामि।

**शक्रः** – गृहीत्वा गच्छामि। (गत्वा पुनरागत्य च) नेच्छामि कर्ण! नेच्छामि।

**कर्णः** – तेन हि जित्वा पृथिवीं ददामि।

**शक्रः** – पृथिव्या किं करिष्यामि?

**कर्णः** – तेन हि मच्छिरो ददामि।

© NCERT not to be republished

**शक्रः** – अविहा! अविहा!

**कर्णः** – न भेतव्यम्, न भेतव्यम्। प्रसीदतु भवान्। अन्यदपि श्रूयताम्– भगवते यदि उचितं स्यात् कुण्डलाभ्यां सह कवचं ददामि।

**शक्रः** – (सहर्षम्) ददातु, ददातु।

**कर्णः** – (आत्मगतम्) एषः एवास्य कामः। (प्रकाशम्) गृह्यताम्।

**शल्यराजः**– अङ्गराज ! न दातव्यम्, न दातव्यम्!

**कर्णः** – शल्यराज ! अलम् अलं वारयितुम्।

**पश्य—**

**शिक्षा क्षयं गच्छति कालपर्ययात्**
**सुबद्धमूला निपतन्ति पादपाः।**
**जलं जलस्थानगतं च शुष्यति**
**हुतं च दत्तं च तथैव तिष्ठति ॥**
**तस्मात् गृह्यताम्। (निवृत्य ददाति)**

© NCERT not to be republished

## वयं शब्दार्थान् जानीमः

| शब्दः | अर्थः | हिन्दी | English | मातृभाषया अर्थं लिखत |
|---|---|---|---|---|
| महत्तराम् | अतिविशालाम् | बहुत बड़ी | Very large | |
| मुहूर्तकम् | क्षणमात्रम् | कुछ देर, क्षण भर | For moment | |
| वाजिनाम् | अश्वानाम् | घोड़ों का | Of horses | |

| | | | | |
|---|---|---|---|---|
| वारणानाम् | गजानाम् | हाथियों का | Of elephants | |
| वृन्दम् | समूहम् | समूह | Group / Multitude | |
| अपर्याप्तम् | असीमितम् | बहुत अधिक | Unlimited | |
| शक्रः | इन्द्रः | इन्द्र | Indra | |
| गृहीत्वा | स्वीकृत्य | ग्रहण कर | Having taken | |
| आगत्य | आगम्य | आकर | Affter come | |
| जित्वा | जयं प्राप्य | जीतकर | Having Conquered | |
| प्रसीदतु | प्रसन्नो भवतु | प्रसन्न हों | Be pleased | |
| भेतव्यम् | भयं करणीयम् | डरना चाहिए | Should be afraid | |
| आत्मगतम् | मनोगतम् | मन ही मन | To oneself | |
| अविहा | हा कष्टम् / मा एवम् (निषेधार्थकम् अव्ययम्) | नहीं, नहीं, ऐसा मत करो (निषेध बोधक अव्यय) | Oh no! / Do not do this | |
| कामः | इच्छा | कामना | Desire | |
| प्रकाशम् | प्रकटम् | प्रकट रूप से | Publicly | |

© NCERT not to be republished

| | | | | |
|---|---|---|---|---|
| अङ्गराजः | हे कर्ण ! (अङ्गदेशस्य नृपः)! | हे कर्ण ! (अङ्ग देश का राजा)! | O' King of An◌ga ! | |
| अलम् अलम् वारयितुम् | निवारणं मा कुरु | रोकना व्यर्थ है | Enough, do not stop | |
| शुष्यति | शुष्कता भवति | सूख जाता है | Dries up | |
| निवृत्य | परावृत्य | लौटकर | Having returned | |
| कालपर्ययात् | समयपरिवर्तनेन / कालक्रमेण | समय बीतने पर, समय बीतने से | With the passage of time | |
| सुबद्धमूलाः | सुदृढमूलाः | बहुत मजबूत जड़ वाले | Very firmly rooted | |
| हुतम् | आहुतिरूपेण अग्नौ क्षिप्तम् | हवन किया हुआ | Offered in sacrifice | |
| पादपः | तरुः | वृक्ष | Tree | |

## अत्र इदम् अवधेयम्

**व्याकरणम्**— उत्तमपुरुषस्य प्रयोगः वक्तुः कृते (बोलने वाले के लिए) भवति। यदा कश्चित् जनः स्वस्य विषये किमपि वदति, तदा उत्तमपुरुषस्य प्रयोगः भवति। अस्मिन् 'अस्मद्'

© NCERT not to be republished

शब्दस्य सर्वनामपदानि कर्तृरूपेण भवन्ति। उत्तमपुरुषस्य संक्षिप्तं विवरणं त्रिषु वचनेषु अधोलिखितम् अस्ति—

| पुरुषः | एकवचनम् | द्विवचनम् | बहुवचनम् |
|---|---|---|---|
| उत्तमपुरुषः | अहम् (मैं/I) | आवाम् (हम दोनों/ We two) | वयम् (हम सब/ We) |

| क्रिया (लट्-लकारे / वर्तमानकाले) | | |
|---|---|---|
| एकवचनम् | द्विवचनम् | बहुवचनम् |
| आमि (पठ् + आमि = पठामि) | आवः (पठ् + आवः = पठावः) | आमः (पठ् + आमः = पठामः) |

**वाक्यप्रयोगाः (उदाहरणानि)**

**एकवचने** अहं पठामि। (मैं पढ़ता/पढ़ती हूँ।) / I am reading

**द्विवचने** आवां पठावः। (हम दोनों पढ़ते/पढ़ती हैं।) / We two are reading

**बहुवचने** वयं पठामः। (हम सब पढ़ते/पढ़ती हैं।) / We are reading

**विशेषः** उत्तमपुरुषस्य सर्वनामपदानि (अहम्, आवाम्, वयम्) त्रिषु लिङ्गेषु (पुल्लिङ्ग-स्त्रीलिङ्ग-नपुंसकलिङ्गेषु) समानानि एव।



## वयम् अभ्यासं कुर्मः

१. एकपदेन उत्तरत—

यथा— प्रश्नः के निपतन्ति?

उत्तरम् पादपाः

© NCERT not to be republished

क. ब्राह्मणवेषधारी कः प्रविशति?

ख. शक्रः कं भिक्षां याचते?

ग. कर्णः प्रथमं किं दातुम् इच्छति?

घ. कालपर्ययात् का क्षयं गच्छति?

ङ. कः कर्णं वारयति?

### २. उचितं पर्यायं मेलयत—

| | क | | ख |
|---|---|---|---|
| यथा— | वृन्दम् | | समूहम् |
| १. | वृक्षाः | क. | अश्वाः |
| २. | शक्रः | ख. | पादपाः |
| ३. | स्वर्णम् | ग. | कनकम् |
| ४. | वाजिनः | घ. | कर्णः |
| ५. | अङ्गराजः | ङ. | इन्द्रः |

### ३. प्रथमपुरुषस्य क्रियापदानि उत्तमपुरुषे परिवर्तयत—

| | क | ख |
|---|---|---|
| यथा— | पिबति | पिबामि |
| क. | करोति | ........................ |
| ख. | ददाति | ........................ |
| ग. | इच्छति | ........................ |
| घ. | गच्छति | ........................ |
| ङ. | हसति | ........................ |

© NCERT not to be republished

## क्रियाकलापः

१. अधोलिखितं श्लोकं सस्वरं गायत अर्थविषये च सहपाठिभिः सह चर्चां कुरुत।

शिक्षा क्षयं गच्छति कालपर्ययात्
सुबद्धमूला निपतन्ति पादपाः।
जलं जलस्थानगतं च शुष्यति
हुतं च दत्तं च तथैव तिष्ठति॥

२. द्वौ छात्रौ मिलित्वा कर्णशक्रयोः संवादस्य ध्वन्यङ्कनं कृत्वा कक्षायां श्रावयताम्।

३. 'अस्मद्' शब्दस्य सर्वाणि रूपाणि प्रदत्त प्रारूपं दृष्ट्वा स्फोरकपत्रे लिखत—

| विभक्तिः | एकवचनम् | द्विवचनम् | बहुवचनम् |
|---|---|---|---|
| प्रथमा | | | |
| द्वितीया | | | |
| तृतीया | | | |
| चतुर्थी | | | |
| पञ्चमी | | | |
| षष्ठी | | | |
| सप्तमी | | | |

© NCERT not to be republished